# द्वितीयसमाकलनपरीक्षा, 2018-19

## संस्कृतम्

अवधिः - होरात्रयम् | कक्षा - अष्टमी | पूर्णांकाः - अशीतिः

विद्यार्थिनः नाम ........................................................................................ वर्गः ....... दिनांकः - 22.9.2018 (शनिवासरः)

**निर्देशाः -**
- **सर्वे प्रश्नाः अनिवार्याः ।**
- **सर्वेषां प्रश्नानाम् उत्तराणि खण्डक्रमानुसारमेव लेखनीयानि।**
- **सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन एव लेखितव्यानि ।**

## खण्डः - क (अपठितावबोधनम् - 5 अंकाः)

**प्र.1 अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

वानराः सेतुनिर्माणम् अकुर्वन् । अधुना यदा सेतुबन्धः अभवत् तदा रामस्य तस्य भ्रातुः च नेतृत्वे सर्वेषाम् वानराणाम् समस्तसेना लंकाम् प्राविशत्। लंकायाः अधिपतिः राक्षसः रावणः निजपुत्रैः बन्धुभिः च सह युद्धाय तत्परः अभवत्। तदा बहुमासं यावत् भयंकरम् युद्धम् अभवत्। अन्ते सः राक्षसराजः रावणः पराजितः। यदा सः मृतः तदा तस्य स्वर्णनिर्मिता अखिला राजधानी वशम् अधिगता।

**I) एकपदेन उत्तरत -** **(½×4=2)**

क) सेतुनिर्माणम् के अकुर्वन् ।

ख) वानराणाम् सेना कुत्र प्राविशत् ?

ग) लंकायाः अधिपतिः राक्षसः कः आसीत् ?

घ) कः मृतः अभवत् ?

**II) पूर्णवाक्येन उत्तरत -** **(1×2=2)**

क) यदा रावणः मृतः तदा किम् अभवत् ?

ख) रावणः कैः सह युद्धाय तत्परः अभवत् ?

**III) निर्देशानुसारम् उत्तरत -** **(1)**

'बन्धुभिः' इति पदे का विभक्तिः किं च वचनम् ? (पंचमी, द्विवचनम्/तृतीया, बहुवचनम्)

## खण्ड - ख (रचनात्मककार्यम् - 20 अंकाः)

**प्र.2 अधोलिखितम् संवादम् मञ्जूषायाः पदानां सहायतया पूरयत -** **(1×5=5)**

**मञ्जूषा -** कीदृशम्, त्वम्, नैव, क्रीडनकम्, वार्तालापम्

सन्ध्या - भो बालक ! (1)............... किम् करोषि ?

रमणः - अहम् मञ्जूषायाम् (2)............... रक्षामि।

सन्ध्या - (3)............... इदम् क्रीडनकम् ?

रमणः - इदम् क्रीडनकम् (4)............... अस्ति। इदम् तु जनकस्य लघु दूरभाषयन्त्रम् अस्ति। दूरात् अपि एतेन वयम् स्वजनैः सह (5)............... कर्तुम् समर्थाः ।

**प्र.3 तव नाम ध्रुवः अस्ति । स्वभगिन्याः जैसिकायाः विवाहे निमंत्रणं दातुं स्वमित्रं प्रति पत्रं पूरयत -** (½×10=5)

**मञ्जूषा -**

| |
|---|
| ज्ञापयामि, भगिन्याः, अग्रिममासस्य, तत्रास्तु, अनिवार्या, त्रिदिनानि, भवन्मित्रम्, अवश्यम्, नमोनमः, तवागमनम् |

पटेलनगरम्
देहली
तिथि - 22.9.2018
प्रियमित्रम् रोहितः
सप्रेम नमोनमः

अत्र कुशलं (1)...............

मित्र ! अहम् प्रसन्नतापूर्वकम् (2)............... यत् मम (3)............... जैसिकायाः विवाहः (4)............. पञ्चम्याम् तिथौ निश्चितः जातः। त्वम् अत्र (5)............... पूर्वतः एव प्राप्तः स्याः। त्वया (6).......... अत्र आगन्तव्यम् वर्तते । तव उपस्थितिः विवाहे (7)............... अस्ति।

आदरणीयाभ्यां पितृभ्याम् सस्नेहं (8)............... अस्तु (9)............... प्रतीक्षमाणः ।
(10)...............
ध्रुवः

**प्र.4 अधोप्रदत्तं चित्रं दृष्ट्वा मञ्जूषायाः पदानां सहायतया पञ्च संस्कृतवाक्येषु वर्णयत -** (2×5=10)

**मञ्जूषा -**

| |
|---|
| कमलानि, तडागे, अस्ति, वृक्षाः, सरोवरस्य, बहिः, तरतः, विकसन्ति, एतत्, मृगौ, कच्छपः, चित्रम् |



## खण्ड - ग (अनुप्रयुक्तव्याकरणम् - 15 अंकाः)

**प्र.5 अधोलिखितानां रेखांकितपदानां सन्धिं विच्छेदं वा कृत्वा लिखत -** (1×3=3)

क) हिमालयः भारतस्य उत्तरस्याम् स्थितः अस्ति ।

ख) अहम् अपि वधू + उत्सवे गास्यामि ।

ग) सः गायिका दिल्लीनगरे वसति ।

**प्र.6 अधोलिखितानां रेखांकित पदानां समासं विग्रहं वा प्रदत्त विकल्पेभ्यः चित्वा लिखत -** (1×3=3)

क) प्रतिदिनम् अध्ययनम् करणीयम् ।

अ) दिने दिने इति ब) दिनस्य प्रति स) दिनम् इति

ख) देशसेवा अस्माकं परमं कर्त्तव्यम् अस्ति ।

अ) देशेषु सेवा ब) देशस्य सेवा स) देशं सेवा

ग) गंगायाः समीपम् एकः तडागः अस्ति ।

अ) गंगस्यसमीपम् ब) गंगसमीपे स) उपगंगम्

**प्र.7 प्रकृति प्रत्ययौ विभागं कृत्वा लिखत -** (1×3=3)

क) मया पत्रं पठनीयम् ।

ख) कक्षायाम् कोलाहलः न कर्त्तव्यः ।

ग) मूषकम् दृष्ट्वा बिडालः आगच्छत् ।

**प्र.8 निर्देशानुसारं शब्दरूपाणि लिखत -** (1×3=3)

क) 'हरि' शब्दस्य पंचमी बहुवचने किं रूपं भविष्यति ?

ख) 'नदी' शब्दस्य चतुर्थी बहुवचने किं रूपं भविष्यति ?

ग) 'रमा' शब्दस्य तृतीया द्विवचने किं रूपं भविष्यति ?

**प्र.9 निर्देशानुरूपं धातुरूपाणि लिखत -** (1×3=3)

क) 'गम्' धातोः लट्लकारस्य उत्तमपुरुषबहुवचने किं रूपं भविष्यति ?

ख) 'चल्' धातोः लृट्लकारस्य मध्यमपुरुषबहुवचने किं रूपं भविष्यति ?

ग) 'खाद्' धातोः लंगलकारस्य प्रथमपुरुषद्विवचने किं रूपं भविष्यति ?

## खण्ड - घ (पठितावबोधनम् - 40 अंकाः)

**प्र.10 अधोलिखितम् गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

अथ एतच्छ्रुत्वा सिंहः अचिन्तयत् - ''नूनमेषा गुहा स्वामिनः सदा समाह्वानं करोति, परंतु मद् भयात् न किंचित् वदति।'' अथवा साध्विदम् उच्यते -

''भयसंत्रस्तमनसां हस्तपादादिकाः क्रियाः ।
प्रवर्तन्ते न वाणी च वेपथुश्चाधिको भवेत् ।।''

तदहम् अस्य आह्वानं करोमि। एवं सः बिले प्रविश्य मे भोज्यं भविष्यति । इत्थं विचार्य सिंहः सहसा शृगालस्य आह्वानमकरोत् ।

**क)** **एकपदेन उत्तरत -** **(1×2=2)**

अ) गुहा सदा किम् करोति ?

ब) सिंहः कस्य आह्वानमकरोत् ?

**ख)** **पूर्णवाक्येन उत्तरत -** **(1×2=2)**

अ) केषाम् हस्तपादादिकाः क्रियाः वाणी च न प्रवर्तन्ते ?

ब) सिंहः किम् अचिन्तयत् ?

**ग)** **निर्देशानुसारं उत्तरत -** **(1)**

अ) ''सिंहः अचिन्तयत्'' इत्यत्र क्रियापदं किम् ?

**प्र.11** **अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

लुब्धस्य नश्यति यशः पिशुनस्य मैत्री,
नष्टक्रियस्य कुलमर्थपरस्य धर्मः ।
विद्याफलं व्यसनिनः कृपणस्य सौख्यं,
राज्यं प्रमत्तसचिवस्य नराधिपस्य ।।

**क)** **एकपदेन उत्तरत -** **(1×2=2)**

अ) कस्य सौख्यं नश्यति ?

ब) कस्य यशः नश्यति ?

**ख)** **पूर्णवाक्येन उत्तरत -** **(1×2=2)**

अ) व्यसनिनः किं नश्यति ?

ब) कस्य राज्यं नश्यति ?

**ग)** **निर्देशानुसारं उत्तरत -** **(½×2=1)**

अ) संधि-विच्छेदं कुरुत - 'नराधिपस्य' ।

**प्र.12** **अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत -** **(2×5=10)**

क) गणिकायाः नाम किम् ?

ख) परहितनिरता के भवन्तु ?

ग) कूपः कीदृशः अस्ति ?

घ) प्रेमलः कदा गृहम् आगच्छत् ?

ड.) बदरी-गुल्मानां पृष्ठे का निलीना आसीत् ?

**प्र.13** **रेखांकितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत -** **(1×4=4)**

क) प्रेमलः काष्ठानि प्राज्ज्वालयत् ।

ख) अनारतं कूर्दनेन व्याघ्रः श्रान्तः अभवत् ।

ग) मधुमक्षिका माधुर्यम् एव जनयति ।

घ) नद्यः सुस्वादुतोयाः भवन्ति ।

**प्र.14 अधोलिखितानां पदानां विभक्तिं वचनं च लिखत -** **(1×4=4)**

| | पदम् | विभक्तिः | वचनम् |
|---|---|---|---|
| क) | वेगैः | .................. | .................. |
| ख) | राष्ट्राय | .................. | .................. |
| ग) | यानानि | .................. | .................. |
| घ) | कुठारिका | .................. | .................. |

**प्र.15 मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत -** **(1×4=4)**

**मञ्जूषा -** निधेहि, परितः, विना, भज

क) विद्यां ................. जीवनं वृथा ।

ख) त्वं पुरतः चरणं .................।

ग) ................. गोविन्दम् ।

घ) ग्रामं ................. वृक्षाः सन्ति ।

**प्र.16 अधोलिखित वाक्यानां संस्कृतेन अनुवादं कुरुत -** **(1×4=4)**

क) छात्र कलम से लिखता है।

ख) वृक्ष से पत्ते गिरते हैं ।

ग) मैं फल खाता हूँ।

घ) मोर नाचता है ।

**प्र.17 मञ्जूषातः विलोमपदं चित्वा लिखत -** **(½×4=2)**

**मञ्जूषा -** आगमनम्, साहसः, परकीयम्, विरक्तिः

क) भीतिः - ...................

ख) अनुरक्तिः - ...................

ग) गमनम् - ...................

घ) स्वकीयम् - ...................

**प्र.18 मञ्जूषातः समानार्थकपदं चित्वा लिखत -** **(½×4=2)**

**मञ्जूषा -** अधुना, हस्तेन, संस्थाप्य, निकटे

क) करेण - ...................

ख) साम्प्रतम् - ...................

ग) पार्श्वे - ...................

घ) स्थापयित्वा - ...................